योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०८४

चतुरशीतितमः सर्गः ८४

श्रीवसिष्ठ उवाच ।।

ततः शिखिध्वजो राजा तत्त्वज्ञानपदं विना ।

आजगाम परं मोहं तमोन्धत्वमिवाप्रजाः ।। १

दुःखाग्निदीपितमना मनागपि विभूतिषु ।

तास्वभीष्टोपनीतासु न रेमेऽग्निशिखास्विव ।। २

एकान्तेषु दिगन्तेषु निर्झरेषु गुहासु च ।

आजगाम रतिं जन्तुर्मुक्तेषुर्व्याधितो यथा ।। ३

राघव त्वमिवाशेषाः सान्त्वानुनयबोधनैः ।

प्रार्थितः कार्यते भृत्यैर्महीपो दिवसक्रियाः ।। ४

नित्यमुद्दामवैराग्यः परिव्राडिव शान्तधीः ।

खिद्यते च महाभोगान्स भोक्तुं च श्रियं स्थितः ।। ३

ददावतितरां दानं गोभूमिकनकादिकम् ।

देवेभ्यो ब्राह्मणेभ्यश्च स्वजनेभ्यश्च मानद ।। ५

चचार च तपः कर्तुं कृच्छ्रचान्द्रायणादिकम् ।

परिबभ्राम तीर्थानि वनान्यायतनानि च ।। ७

स तथापि विशोकत्वं न मनागपि लब्धवान् ।

अनिधानां खनन्भूमिं निधानार्थी निधिं यथा ।। ८

रात्रिंदिवं महानेष शुष्यत्येव कृशानुना ।

चिन्तया चिन्तयामास संसारव्याधिभेषजम् ।। ९

चिन्तापरवशो दीनो राज्यं स्वस्य विषोपमम् ।

महाविभवमप्यग्रे नापश्यत्खिन्नया धिया ।। १०

अथैकदैकान्तगतां चूडालामङ्कमागताम् ।
इदं मधुरया वाचा समुवाच शिखिध्वजः ।। ११
शिखिध्वज उवाच ।
भुक्तं राज्यं चिरं कालं भुक्ता विभवभूमयः ।
अधुनास्मि विरागेण युक्तो गच्छामि काननम् ।। १२
न सुखानि न दुःखानि नापदो न च संपदः ।
क्रोडीकुर्वन्ति तन्वङ्गि मुनिं वननिवासिनम् ।। १३
न देशभङ्गसंमोहो न संग्रामे जनक्षयः ।
राज्यादप्यधिकं मन्ये सुखं वननिवासिनाम् ।। १४
स्तबकस्तनधारिण्यो रक्तपल्लवपाणयः ।
मञ्जरीजालहारिण्यो लोलशुभ्राम्बुदांशुकाः ।। १५
स्वपरागाङ्गरागिण्यः कृतकौसुममण्डनाः ।
आसेव्यकाञ्चनशिलानितम्बतटशोभिताः ।। १६
तरङ्गमौक्तिकप्रोतसरिन्मुक्तालतावृताः ।
लतावयस्यावलिता मुग्धमुग्धमृगात्मजाः ।। १७
स्वभावोद्दामसौगन्ध्या वितीर्णफलभोजनाः ।
षट्पदश्रेणिनयनाः पुष्पापूरलताङ्गिकाः ।। १८
आस्वाद्यस्यन्दतां याताः शीतलामलगात्रिकाः ।
रमयन्ति त्वमिव मां वनवीथ्यो वरानने ।। १९
यथा विविक्तमेकान्ते मनो भवति निर्वृतम् ।
न तथा शशिबिम्बेषु न च ब्रह्मेन्द्रसद्मसु ।। २०
अस्मिन्सन्मन्त्रणे तन्वि न विघ्नं कर्तुमर्हसि ।
भर्तुर्विघटयन्तीच्छां न स्वप्नेऽपि कुलस्त्रियः ।। २१
चूडालोवाच ।
प्राप्तकालं कृतं कार्यं राजते नाथ नेतरत् ।
वसन्ते राजते पुष्पं फलं शरदि राजते ।। २२

जराजरठदेहानां युक्तो वनसमाश्रयः ।

न यूनां त्वादृशामेव तेनैतन्मे न रोचते ।। २३

यौवनेन महाराज न यावद्वयमुज्झिताः ।

पुष्पौघेणेव तरवस्तावच्छोभामहे गृहे ।। २४

पुष्पधाना पुष्पमितजरसा सह काननम् ।

समं गृहाद्गमिष्यामो हंसा इव सरोवरात् ।। २५

अप्राप्तकालं नृपतेः प्रजापालनमुज्झतः ।

राजन्यस्यैव रन्ध्रस्य महदेनो भविष्यति ।। २६

अप्राप्तकारिणं भूपं रोधयन्ति च वै प्रजाः ।

रोधयन्ति ह्यकार्येभ्यः प्रभुं भृत्याः परस्परम् ।। २७

शिखिध्वज उवाच ।

अलमुत्पलपत्राक्षि विघ्नेनाभिमतस्य मे ।

विद्धि मां गतमेवेतो दूरमेकान्तकाननम् ।। २८

बाला त्वमनवद्याङ्गि नागन्तव्यं वनं त्वया ।

पुंसामपि हि मृद्वङ्गि दुर्विगाह्यो वनाश्रयः ।। २९

समर्था न वनावासे योषितः कठिना अपि ।

कानने पुष्पमञ्जर्यः सोढुं शस्त्रालिमक्षमाः ।। ३०

भवत्या पालयन्त्येह राज्ये स्थातव्यमुत्तमे ।

कुटुम्बभारोद्वहनं पत्यौ याते व्रतं स्त्रियः ।। ३१

श्रीवसिष्ठ उवाच ।

इत्युक्त्वा दयितां राजा तामिन्दुवदनां वशी ।

उत्तस्थौ स्नातुमखिलं दिनकार्यं चकार च ।। ३२

अथोज्झितप्रजाचेष्टो रविरस्ताचलं ययौ ।

शिखिध्वजो वनमिव समस्तजनदुर्गमम् ।। ३३

संहृत्य विततं रूपं तमेवानुययौ प्रभा ।

नाथं भवननिष्क्रान्तं चूडालेवानुरागिणी ।। ३४

आययौ यामिनी श्यामा भुवनं भस्मधूसरम् ।
धृतव्योमापगं शर्वं संश्लेषा यमुनेव सा ।। ३
दिक्षु संध्याब्ददन्तासु स्थितासु कृतमण्डलम् ।
तमालबालकाङ्कासु ज्योत्स्नाहासोदयाङ्कितम् ।। ३६
गच्छतोरपरं पारं दंपत्योर्मैरव पदम् ।
देवोद्यानमयं रन्तुं दिनश्रीदिननाथयोः ।। ३७
आगच्छतोरिदं पारं ह्यघतीक्ष्णकरोज्झितम् ।
निशानिशानायकयोर्दंपत्योर्मैरवं पुनः ।। ३८
तारागणोऽथ ददृशे विकीर्णो व्योमकुट्टिमे ।
मुक्तो मङ्गललाजानां दिग्वधूभिरिवाञ्जलिः ।। ३९
चन्द्रानना तमःश्यामा श्रान्ता कुसुमहासिनी ।
यामिनी यौवनं प्राप सरोजमुकुलस्तनी ।। ४०
कृतसंध्यासमाचारः सहचूडालयेष्टया ।
सुष्वाप शयने भूयो मैनाक इव सागरे ।। ४१
अथार्धरात्रसमये देशे निःशब्दतां गते ।
घननिद्राशिलाकोशनिलीने सकले जने ।। ४२
स तस्यां संप्रसुप्तायां शयने कोमलांशुके ।
भृशं निद्राविमूढायां भ्रमर्यामिव पङ्कजे ।। ४३
तत्याज दयितां सुप्तामङ्काद्राजा शिखिध्वजः ।
स्वैरं स्वैरं मुखं राहोर्दिशं चान्द्रप्रभामिव ।। ४४
उत्तस्थौ शयनाल्लीनवधूकार्धाञ्चलांशुकात् ।
सलक्ष्मीकान्तिलोलोर्मेर्हरिः क्षीरार्णवादिव ।। ४५
वीरक्रमार्थं यामीति तत्रैवानुचरव्रजम् ।
योजयित्वा जगामासौ पुरान्निर्गत्य पूर्णधीः ।। ४६
राज्यलक्ष्मि नमस्तुभ्यमित्युक्त्वा मण्डलाद्गतः ।
विवेशोग्रामरण्यानीमेको नद इवार्णवम् ।। ४७

घनान्धकारगुल्माढ्या क्षुद्रभूतौघकर्कशा ।

सारण्यानी निशा सार्धं समं तेनातिवाहिता ।। ४८

प्रातः शून्यामरण्यानीं स नीत्वा विततं दिनम् ।

सममर्केण कस्यांचिद्दिशश्राम वनावनौ ।। ४९

भानावदृश्यतां याते तत्र स्नानादिपूर्वकम् ।

किंचित्फलादिकं भुक्त्वा तां निनाय तमस्विनीम् ।।५०

पुनः प्रातः पुराण्युच्चैर्मण्डलानि गिरीन्नदीः ।

जवादुल्लङ्घयामास राजा द्वादशशर्वरीः ।। ५१

ततो मन्दरशैलस्य तटस्थं जनदुर्गमम् ।

प्राप काननमत्यन्तदूरस्थजनतापुरम् ।। ५२

रटत्प्रणालसलिलवापीवलितपादपम् ।

शीर्णवेद्यालयज्ञातभूतपूर्वद्विजाश्रमम् ।। ५३

क्षुद्रप्राणिविनिर्मुक्तसिद्धसेव्यलतालयम् ।

आपूर्णपादपलतं प्राणवृत्तिक्ररैः फलैः ।। ५४

तत्रैकस्मिन्समे शुद्धे स्थले सलिलमालिते ।

शीतले शाद्वलश्यामे स्निग्धे सफलपादपे ।। ५५

समञ्जरीभिर्वल्लीभिः स चकारोटजालयम् ।

प्रावृट्कालः सविद्युद्भिर्नीलाभ्रैरिव पञ्जरम् ।। ५६

मसृणं वैणवं दण्डं फलभोजनभाजनम् ।

अर्घपात्रं पुष्पभाण्डमक्षमालां कमण्डलुम् ।। ५७

कन्थां शीतापनोदाय बृसीं चैव मृगाजिनम् ।

आनीयायोजयत्तस्मिन्मठिकामन्दिरे नृप ।। ५८

यत्किंचिदन्यद्वा वस्तु योग्यं तापसकर्मणि ।

तत्तत्र स्थापयामास जगतीव क्रमं विधिः ।। ५९

संध्यापूर्वं जपं प्रातः प्रहरे स तदाकरोत् ।

पुष्पोच्चयं द्वितीये तु स्नानं देवार्चनं ततः ।। ६०

पश्चाद्वनफलं किंचिद्वनकन्दं विसादि च ।

भुक्त्वा जप्यपरो भूत्वा निनायैको निशां वशी ।। ६१

इति दिवसमखेदं मन्दरोपान्तकच्छे

विरचित उटजेऽन्तर्मालवेशो निनाय ।

नवनृपतिविलासं तं न सस्मार कं वा

स्फुरति हृदि विवेके राज्यलक्ष्म्यो हरन्ति ।। ६२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० चू० शिखिध्वजप्रव्रज्या नाम चतुरशीतितमः सर्गः ।। ८४।।